I	हुवे	हुवहे	हुमहे	अहुवि	अहुवहि	अहुमहि
		Imperative.			*Potential.*	
III	हुताम्	हुवाताम्	हुवताम्	हुवीत	हुवीयाताम्	हुवीरन्
II	हुष्व	हुवाथाम्	हुध्वम्	हुवीथाः	हुवीयाथाम्	हुवीध्वम्
I	हवै	हवावहै	हवामहै	हुवीय	हुवीवहि	हुवीमहि

Third Conjugation.

The roots of the third conjugation also are more irregular than those of the 2nd. The root takes reduplication, rules of which perplex the memory of young students. The * rules of reduplication are very necessary to know the forms of some of the non-conjugational tenses and to form derivative verbs such as Desideratives, Frequentatives, &c., but they are of very little use in conjugating verbs of the 3rd Conj. if the correct forms of the conjugational tenses are learnt by heart.

ऋ *to go.*

		Present.			*Imperfect.*	
III	इयर्ति	इयृतः	इयृति	ऐयः	ऐयृताम्	ऐयरुः
II	इयर्षि	इयृथः	इयृथ	ऐयः	ऐयृतम्	ऐयृत
I	इयर्मि	इयृवः	इयृमः	ऐयरम्	ऐयृव	ऐयृम
		Imperative.			*Potential.*	
III	इयर्तु	इयृताम्	इयृतु	इयृयात्	इयृयाताम्	इयृयुः
II	इयृहि	इयृतम्	इयृत	इयृयाः	इयृयातम्	इयृयात
I	इयराणि	इयराव	इयराम	इयृयाम्	इयृयाव	इयृयाम

* These rules are given in the treatment of the Perfect; Part II.

Digitized by Google

दा *to give.* P. A.

	S.	D.	P.	S.	D.	P.
		P.	*Present.*		A.	
III	ददाति	दत्तः	ददति	दत्ते	ददाते	ददते
II	ददासि	दत्थः	दत्थ	दत्से	ददाथे	दद्ध्वे
I	ददामि	दद्वः	दद्मः	ददे	दद्वहे	दद्महे
			Imperfect.			
III	अददात्	अदत्ताम्	अददुः	अदत्त	अददाताम्	अददत
II	अददाः	अदत्तम्	अदत्त	अदत्थाः	अददाथाम्	अदद्ध्वम्
I	अददाम्	अदद्व	अदद्म	अददि	अदद्वहि	अदद्महि
			Imperative.			
III	ददातु	दत्ताम्	ददतु	दत्ताम्	ददाताम्	ददताम्
II	देहि	दत्तम्	दत्त	दत्स्व	ददाथाम्	दद्ध्वम्
I	ददानि	ददाव	ददाम	ददै	ददावहै	ददामहै
			Potential.			
III	दद्यात्	दद्याताम्	दद्युः	ददीत	ददीयाताम्	ददीरन्
II	दद्याः	दद्यातम्	दद्यात	ददीथाः	ददीयाथाम्	ददीध्वम्
I	दद्याम्	दद्याव	दद्याम	ददीय	ददीवहि	ददीमहि

धा *to put.* P. A.

			Present.			
III	दधाति	धत्तः	दधति	धत्ते	दधाते	दधते
II	दधासि	धत्थः	धत्थ	धत्से	दधाथे	धद्ध्वे
I	दधामि	दध्वः	दध्मः	दधे	दध्वहे	दध्महे
			Imperfect.			
III	अदधात्	अधत्ताम्	अदधुः	अधत्त	अदधाताम्	अदधत
II	अदधाः	अधत्तम्	अधत्त	अधत्थाः	अदधाथाम्	अधद्ध्वम्
I	अदधाम्	अदध्व	अदध्म	अदधि	अदध्वहि	अदध्महि
			Imperative.			
III	दधातु	धत्ताम्	दधतु	धत्ताम्	दधाताम्	दधताम्
II	धेहि	धत्तम्	धत्त	धत्स्व	दधाथाम्	धद्ध्वम्
I	दधानि	दधाव	दधाम	दधै	दधावहै	दधामहै

Digitized by Google

	S.	D.	P.	S.	D.	P.
		P.	*Potential.*		A.	
III	दध्यात्	दध्याताम्	दध्युः	दधीत	दधीयाताम्	दधीरन्
II	दध्याः	दध्यातम्	दध्यात	दधीथाः	दधीयाथाम्	दधीध्वम्
I	दध्याम्	दध्याव	दध्याम	दधीय	दधीवहि	दधीमहि

* निज् *to purify.*

Present.

III	नेनेक्ति	नेनिक्तः	नेनिजति	नेनिक्ते	नेनिजाते	नेनिजते
II	नेनेक्षि	नेनिक्थः	नेनिक्थ	नेनिक्षे	नेनिजाथे	नेनिग्ध्वे
I	नेनेज्मि	नेनिज्वः	नेनिज्मः	नेनिजे	नेनिज्वहे	नेनिज्महे

Imperfect.

III	अनेनेक्	अनेनिक्ताम्	अनेनिजुः	अनेनिक्त	अनेनिजाताम्	अनेनिजत
II	अनेनेक्	अनेनिक्तम्	अनेनिक्त	अनेनिक्थाः	अनेनिजाथाम्	अनेनिग्ध्वम्
I	अनेनिजम्	अनेनिज्व	अनेनिज्म	अनेनिजि	अनेनिज्वहि	अनेनिज्महि

Imperative.

III	नेनेक्तु	नेनिक्ताम्	नेनिजतु	नेनिक्ताम्	नेनिजाताम्	नेनिजताम्
II	नेनिग्धि	नेनिक्तम्	नेनिक्त	नेनिक्ष्व	नेनिजाथाम्	नेनिग्ध्वम्
I	नेनिजानि	नेनिजाव	नेनिजाम	नेनिजै	नेनिजावहै	नेनिजामहै

Potential.

III	नेनिज्यात्	नेनिज्याताम्	नेनिज्युः	नेनिजीत	नेनिजीयाताम्	नेनिजीरन्
II	नेनिज्याः	नेनिज्यातम्	नेनिज्यात	नेनिजीथाः	नेनिजीयाथाम्	नेनिजीध्वम्
I	नेनिज्याम्	नेनिज्याव	नेनिज्याम	नेनिजीय	नेनिजीवहि	नेनिजीमहि

पॄ *to fill. P.*

	Present.			*Imperfect.*		
III	पिपर्ति	पिपूतः	पिप्रति	अपिपः	अपिपूताम्	अपिपरुः
II	पिपर्षि	पिपूथः	पिपूथ	अपिपः	अपिपूतम्	अपिपूत
I	पिपर्मि	पिपूवः	पिपूमः	अपिपरम्	अपिपूव	अपिपूम

	Imperative.			*Potential.*		
III	पिपर्तु	पिपूताम्	पिप्रतु	पिपृयात्	पिपृयाताम्	पिपृयुः
II	पिपृहि	पिपूतम्	पिपूत	पिपृयाः	पिपृयातम्	पिपृयात
I	पिपराणि	पिपराव	पिपराम	पिपृयाम्	पिपृयाव	पिपृयाम

पॄ *to fill. P.*

III	पिपर्ति	†पिपूर्तः	पिपुरति	अपिपः	अपिपूर्ताम्	अपिपरुः
II	पिपर्षि	पिपूर्थः	पिपूर्थ	अपिपः	अपिपूर्तम्	अपिपूर्त
I	पिपर्मि	पिपूर्वः	पिपूर्मः	अपिपरम्	अपिपूर्व	अपिपूर्म

* विज् to separate is conjugated like निज्. † See note † page 6.

Digitized by Google

	S.	*D.*	*P.*	*S.*	*D.*	*P.*
		Imperative.			*Potential.*	
III	पिपर्तु	पिपूर्ताम्	पिपुरतु	पिपूर्यात्	पिपूर्याताम्	पिपूर्युः
II	पिपूर्हि	पिपूर्तम्	पिपूर्त	पिपूर्याः	पिपूर्यातम्	पिपूर्यात
I	पिपराणि	पिपराव	पिपराम	पिपूर्याम्	पिपूर्याव	पिपूर्याम

भी *to fear.* P.

	Present.		*Imperfect.*	
III	बिभेति { बिभीतः / बिभितः }	बिभ्यति	अबिभेत् { अबिभीताम् / अबिभिताम् }	अबिभयुः
II	बिभेषि { बिभीथः / बिभिथः }	बिभीथ / बिभिथ	अबिभेः { अबिभीतम् / अबिभितम् }	अबिभीत / अबिभित
I	बिभेमि { बिभीवः / बिभिवः }	बिभीमः / बिभिमः	अबिभयम् { अबिभीव / अबिभिव }	अबिभीम / अबिभिम

	Imperative.			*Potential.*		
III	बिभेतु { बिभीताम् / बिभिताम् }		बिभ्यतु	{ बिभीयात् / बिभियात् }	बिभीयाताम् / बिभियाताम्	बिभीयुः / बिभियुः
II	{ बिभीहि / बिभिहि }	बिभीतम् / बिभितम्	बिभीत / बिभित	{ बिभीयाः / बिभियाः }	बिभीयातम् / बिभियातम्	बिभीयात / बिभियात
I	बिभयानि	बिभयाव	बिभयाम	{ बिभीयाम् / बिभियाम् }	बिभीयाव / बिभियाव	बिभीयाम / बिभियाम

भृ *to bear.* P. A.

	P.			*Present.*	A.	
III	बिभर्ति	बिभृतः	बिभ्रति	बिभृते	बिभ्राते	बिभ्रते
II	बिभर्षि	बिभृथः	बिभृथ	बिभृषे	बिभ्राथे	बिभृध्वे
I	बिभर्मि	बिभृवः	बिभृमः	बिभ्रे	बिभृवहे	बिभृमहे

Imperfect.

III	अबिभः	अबिभृताम्	अबिभरुः	अबिभृत	अबिभ्राताम्	अबिभ्रत
II	अबिभः	अबिभृतम्	अबिभृत	अबिभृथाः	अबिभ्राथाम्	अबिभृध्वम्
I	अबिभरम्	अबिभृव	अबिभृम	अबिभ्रि	अबिभृवहि	अबिभृमहि

Imperative.

III	बिभर्तु	बिभृताम्	बिभ्रतु	बिभृताम्	बिभ्राताम्	बिभ्रताम्
II	बिभृहि	बिभृतम्	बिभृत	बिभृष्व	बिभ्राथाम्	बिभृध्वम्
I	बिभराणि	बिभराव	बिभराम	बिभरै	बिभरावहै	बिभरामहै

Digitized by Google

	S.	D.	P.	S.	D.	P.
			Potential.			
III	बिभृयात्	बिभृयाताम्	बिभृयुः	बिभ्रीत	बिभ्रीयाताम्	बिभ्रीरन्
II	बिभृयाः	बिभृयातम्	बिभृयात	बिभ्रीथाः	बिभ्रीयाथाम्	बिभ्रीध्वम्
I	बिभृयाम्	बिभृयाव	बिभृयाम	बिभ्रीय	बिभ्रीवहि	बिभ्रीमहि

मा *to measure. A.*

	Present.			*Imperfect.*		
III	मिमीते	मिमाते	मिमते	अमिमीत	अमिमाताम्	अमिमत
II	मिमीषे	मिमाथे	मिमीध्वे	अमिमीथाः	अमिमाथाम्	अमिमीध्वम्
I	मिमे	मिमीवहे	मिमीमहे	अमिमि	अमिमीवहि	अमिमीमहि
	Imperative.			*Potential.*		
III	मिमीताम्	मिमाताम्	मिमताम्	मिमीत	मिमीयाताम्	मिमीरन्
II	मिमीष्व	मिमायाम्	मिमीध्वम्	मिमीथाः	मिमीयाथाम्	मिमीध्वम्
I	मिमै	मिमावहै	मिमामहै	मिमीय	मिमीवहि	मिमीमहि

विष् *to pervade. P. A.*

	P.		*Present.*	A.		
III	वेवेष्टि	वेविष्टः	वेविषति	वेविष्टे	वेविषाते	वेविषते
II	वेवेक्षि	वेविष्ठः	वेविष्ठ	वेविक्षे	वेविषाथे	वेविड्ढ्वे
I	वेवेष्मि	वेविष्वः	वेविष्मः	वेविषे	वेविष्वहे	वेविष्महे
			Imperfect.			
III	अवेवेट्	अवेविष्टाम्	अवेविषुः	अवेविष्ट	अवेविषाताम्	अवेविषत
II	अवेवेट्	अवेविष्टम्	अवेविष्ट	अवेविष्ठाः	अवेविषाथाम्	अवेविड्ढ्वम्
I	अवेविषम्	अवेविष्व	अवेविष्म	अवेविषि	अवेविष्वहि	अवेविष्महि
			Imperative.			
III	वेवेष्टु	वेविष्टाम्	वेविषतु	वेविष्टाम्	वेविषाताम्	वेविषताम्
II	वेविड्ढि	वेविष्टम्	वेविष्ट	वेविक्ष्व	वेविषाथाम्	वेविड्ढ्वम्
I	वेविषाणि	वेविषाव	वेविषाम	वेविषै	वेविषावहै	वेविषामहै
			Potential.			
III	वेविष्यात्	वेविष्याताम्	वेविष्युः	वेविषीत	वेविषीयाताम्	वेविषीरन्
II	वेविष्याः	वेविष्यातम्	वेविष्यात	वेविषीथाः	वेविषीयाथाम्	वेविषीध्वम्
I	वेविष्याम्	वेविष्याव	वेविष्याम	वेविषीय	वेविषीवहि	वेविषीमहि

हा *to go. A.*

	Present.			*Imperfect.*		
III	जिहीते	जिहाते	जिहते	अजिहीत	अजिहाताम्	अजिहत
II	जिहीषे	जिहाथे	जिहीध्वे	अजिहीथाः	अजिहाथाम्	अजिहीध्वम्
I	जिहे	जिहीवहे	जिहीमहे	अजिहि	अजिहीवहि	अजिहीमहि

Digitized by Google

	S.	D.	P.	S.	D.	P.
		Imperative.			*Potential.*	
III	जिहीताम्	जिहाताम्	जिहताम्	जिहीत	जिहीयाताम्	जिहीरन्
II	जिहीष्व	जिहाथाम्	जिहीध्वम्	जिहीथाः	जिहीयाथाम्	जिहीध्वम्
I	जिहै	जिहावहै	जिहामहै	जिहीय	जिहीवहि	जिहीमहि

हा *to abandon. P.*

		Present.			*Imperfect.*	
III	जहाति	जहितः / जहीतः	जहति	अजहात्	अजहिताम् / अजहीताम्	अजहुः
II	जहासि	जहिथः / जहीथः	जहिथ जहीथ	अजहाः	अजहितम् / अजहीतम्	अजहित अजहीत
I	जहामि	जहिवः / जहीवः	जहिमः जहीमः	अजहाम्	अजहिव / अजहीव	अजहिम अजहीम

		Imperative.			*Potential.*	
III	जहातु	जहिताम् / जहीताम्	जहतु	जह्यात्	जह्याताम्	जह्युः
II	जहाहि / जहिहि / जहीहि	जहितम् / जहीतम्	जहित जहीत	जह्याः	जह्यातम्	जह्यात
I	जहानि	जहाव	जहाम	जह्याम्	जह्याव	जह्याम

हु *to sacrifice. P.*

		Present.			*Imperfect.*	
III	जुहोति	जुहुतः	जुह्वति	अजुहोत्	अजुहुताम्	अजुह्वुः
II	जुहोषि	जुहुथः	जुहुथ	अजुहोः	अजुहुतम्	अजुहुत
I	जुहोमि	जुहुवः	जुहुमः	अजुहवम्	अजुहुव	अजुहुम

		Imperative.			*Potential.*	
III	जुहोतु	जुहुताम्	जुह्वतु	जुहुयात्	जुहुयाताम्	जुहुयुः
II	जुहुधि	जुहुतम्	जुहुत	जुहुयाः	जुहुयाताम्	जुहुयात
I	जुहवानि	जुहवाव	जुहवाम	जुहुयाम्	जुहुयाव	जुहुयाम

ह्री *to blush. P.*

		Present.			*Imperfect.*	
III	जिह्रेति	जिह्रीतः	जिह्रियति	अजिह्रेत्	अजिह्रीताम्	अजिह्रयुः
II	जिह्रेषि	जिह्रीथः	जिह्रीथ	अजिह्रेः	अजिह्रीतम्	अजिह्रीत
I	जिह्रेमि	जिह्रीवः	जिह्रीमः	अजिह्रियम्	अजिह्रीव	अजिह्रीम

Digitized by Google

	S.	D.	P.	S.	D.	P.
		Imperative.			*Potential.*	
III	जिहेतु	जिहीताम्	जिहियतु	जिहीयात्	जिहीयाताम्	जिहीयुः
II	जिहीहि	जिहीतम्	जिहीत	जिहीयाः	जिहीयातम्	जिहीयात
I	जिहयाणि	जिहयाव	जिहयाम	जिहीयाम्	जिहीयाव	जिहीयाम

Fifth and Eighth Conjugations.

नु and उ are added on to the roots of the 5th and 8th Conjugations respectively. The vowel उ of the conjugational sign is changed to ओ before strong terminations.

The उ when not preceded by a conjunct consonant is dropped optionally before व and म. It is changed to उव् before a vowel weak termination, if preceded by a conjunct consonant; and to व् in other cases.

Present Tense.

Parasmaipada. *Âtmanepada.*

5th Conjugation.

चि *to collect. P. A.*

III	चिनोति	चिनुतः	चिन्वन्ति	चिनुते	चिन्वाते	चिन्वते
II	चिनोषि	चिनुथः	चिनुथ	चिनुषे	चिन्वाथे	चिनुध्वे
I	चिनोमि	चिनुवः / चिन्वः	चिनुमः / चिन्मः	चिन्वे	चिनुवहे / चिन्वहे	चिनुमहे / चिन्महे

	शक् *to be able.*			अश् *to pervade.*		
III	शक्नोति	शक्नुतः	शक्नुवन्ति	अश्नुते	अश्नुवाते	अश्नुवते
II	शक्नोषि	शक्नुथः	शक्नुथ	अश्नुषे	अश्नुवाथे	अश्नुध्वे
I	शक्नोमि	शक्नुवः	शक्नुमः	अश्नुवे	अश्नुवहे	अश्नुमहे

8th Conjugation.

तन् *to stretch.*

III	तनोति	तनुतः	तन्वन्ति	तनुते	तन्वाते	तन्वते
II	तनोषि	तनुथः	तनुथ	तनुषे	तन्वाथे	तनुध्वे
I	तनोमि	तनुवः / तन्वः	तनुमः / तन्मः	तन्वे	तनुवहे / तन्वहे	तनुमहे / तन्महे

Digitized by Google

S.	D.	P.	S.	D.	P.
P.		*Imperfect.*			A.

5th Conjugation.

	to give pain.			*to extract soma juice.*		
III	अदुनोत्	अदुनुताम्	अदुन्वन्	असुनुत	असुन्वाताम्	असुन्वत
II	अदुनोः	अदुनुतम्	अदुनुत	असुनुथाः	असुन्वाथाम्	असुनुध्वम्
I	अदुनवम्	अदुनुव / अदुन्व	अदुनुम / अदुन्म	असुन्वि	असुनुवहि / असुन्वहि	असुनुमहि / असुन्महि

	आप् to obtain.			*अश् to pervade.*		
III	आप्नोत्	आप्नुताम्	आप्नुवन्	आश्नुत	आश्नुवाताम्	आश्नुवत
II	आप्नोः	आप्नुतम्	आप्नुत	आश्नुथाः	आश्नुवाथाम्	आश्नुध्वम्
I	आप्नवम्	आप्नुव	आप्नुम	आश्नुवि	आश्नुवहि	आश्नुमहि

8th Conjugation.

	क्षण् to wound.			*मन् to mind.*		
III	अक्षणोत्	अक्षणुताम्	अक्षण्वन्	अमनुत	अमन्वाताम्	अमन्वत
II	अक्षणोः	अक्षणुतम्	अक्षणुत	अमनुथाः	अमन्वाथाम्	अमनुध्वम्
I	अक्षणवम्	अक्षणुव / अक्षण्व	अक्षणुम / अक्षण्म	अमन्वि	अमनुवहि / अमन्वहि	अमनुमहि / अमन्महि

Imperative.

5th Conjugation.

	हि to send.			*वृ to cover.*		
III	हिनोतु	हिनुताम्	हिन्वन्तु	वृणुताम्	वृण्वाताम्	वृण्वताम्
II	हिनु	हिनुतम्	हिनुत	वृणुष्व	वृण्वाथाम्	वृणुध्वम्
I	हिनवानि	हिनवाव	हिनवाम	वृणवै	वृणवावहै	वृणवामहै

	साध् to accomplish.			*अश् to pervade.*		
III	साध्नोतु	साध्नुताम्	साध्नुवन्तु	अश्नुताम्	अश्नुवाताम्	अश्नुवताम्
II	साध्नुहि	साध्नुतम्	साध्नुत	अश्नुष्व	अश्नुवाथाम्	अश्नुध्वम्
I	साध्नवानि	साध्नवाव	साध्नवाम	अश्नवै	अश्नवावहै	अश्नवामहै

8th Conjugation.

	क्षिण् to wound.			*वन् to beg.*		
III	क्षिणोतु	क्षिणुताम्	क्षिण्वन्तु	वनुताम्	वन्वाताम्	वन्वताम्
II	क्षिणु	क्षिणुतम्	क्षिणुत	वनुष्व	वन्वाथाम्	वनुध्वम्
I	क्षिणवानि	क्षिणवाव	क्षिणवाम	वनवै	वनवावहै	वनवामहै

Digitized by Google

	S.	D.	P.	S.	D.	P.
			Potential Mood.			
			5th Conjugation.			
			स्तृ *to cover.*			
III	स्तृणुयात्	स्तृणुयाताम्	स्तृणुयुः	स्तृण्वीत	स्तृण्वीयाताम्	स्तृण्वीरन्
II	स्तृणुयाः	स्तृणुयातम्	स्तृणुयात	स्तृण्वीयाः	स्तृण्वीयाथाम्	स्तृण्वीध्वम्
I	स्तृणुयाम्	स्तृणुयाव	स्तृणुयाम	स्तृण्वीय	स्तृण्वीवहि	स्तृण्वीमहि
	धृष् *to challenge.*			अश् *to pervade.*		
III	धृष्णुयात्	धृष्णुयाताम्	धृष्णुयुः	अश्नुवीत	अश्नुवीयाताम्	अश्नुवीरन्
II	धृष्णुयाः	धृष्णुयातम्	धृष्णुयात	अश्नुवीयाः	अश्नुवीयाथाम्	अश्नुवीध्वम्
I	धृष्णुयाम्	धृष्णुयाव	धृष्णुयाम	अश्नुवीय	अश्नुवीवहि	अश्नुवीमहि
			8th Conjugation.			
			तन् *to stretch.*			
III	तनुयात्	तनुयाताम्	तनुयुः	तन्वीत	तन्वीयाताम्	तन्वीरन्
II	तनुयाः	तनुयातम्	तनुयात	तन्वीयाः	तन्वीयाथाम्	तन्वीध्वम्
I	तनुयाम्	तनुयाव	तनुयाम	तन्वीय	तन्वीवहि	तन्वीमहि

The root कृ to do P. A. belonging to the 8th conjugation is irregular; we shall conjugate it throughout.

	P.			कृ *to do. P. A.*		A.
				Present.		
III	करोति	कुरुतः	कुर्वन्ति	कुरुते	कुर्वाते	कुर्वते
II	करोषि	कुरुथः	कुरुथ	कुरुषे	कुर्वाथे	कुरुध्वे
I	करोमि	कुर्वः	कुर्मः	कुर्वे	कुर्वहे	कुर्महे
				Imperfect.		
III	अकरोत्	अकुरुताम्	अकुर्वन्	अकुरुत	अकुर्वाताम्	अकुर्वत
II	अकरोः	अकुरुतम्	अकुरुत	अकुरुथाः	अकुर्वाथाम्	अकुरुध्वम्
I	अकरवम्	अकुर्व	अकुर्म	अकुर्वि	अकुर्वहि	अकुर्महि
				Imperative.		
III	करोतु	कुरुताम्	कुर्वन्तु	कुरुताम्	कुर्वाताम्	कुर्वताम्
II	कुरु	कुरुतम्	कुरुत	कुरुष्व	कुर्वाथाम्	कुरुध्वम्
I	करवाणि	करवाव	करवाम	करवै	करवावहै	करवामहै
				Potential.		
III	कुर्यात्	कुर्याताम्	कुर्युः	कुर्वीत	कुर्वीयाताम्	कुर्वीरन्
II	कुर्याः	कुर्यातम्	कुर्यात	कुर्वीथाः	कुर्वीयाथाम्	कुर्वीध्वम्
I	कुर्याम्	कुर्याव	कुर्याम	कुर्वीय	कुर्वीवहि	कुर्वीमहि

Digitized by Google

Seventh Conjugation.

In the Seventh Conjugation न is inserted between the last vowel and the final consonant of a root. The न loses its अ before weak terminations.

The original nasal of a root is dropped.

अञ्ज् *to anoint.*

	S.	*D.*	*P.*	*S.*	*D.*	*P.*
		P.			**A.**	
		Present.			*Imperfect.*	
III	अनक्ति	अङ्क्तः	अञ्जन्ति	आनक्	आङ्क्ताम्	आञ्जन्
II	अनक्षि	अङ्क्थः	अङ्क्थ	आनक्	आङ्क्तम्	आङ्क्त
I	अनज्मि	अञ्ज्वः	अञ्ज्मः	आनजम्	आञ्ज्व	आञ्ज्म
		Imperative.			*Potential.*	
III	अनक्तु	अङ्क्ताम्	अञ्जन्तु	अञ्ज्यात्	अञ्ज्यास्ताम्	अञ्ज्युः
II	अङ्ग्धि	अङ्क्तम्	अङ्क्त	अञ्ज्याः	अञ्ज्यातम्	अञ्ज्यात
I	अनजानि	अनजाव	अनजाम	अञ्ज्याम्	अञ्ज्याव	अञ्ज्याम

इन्ध् *to kindle. A.*

	Present.			*Imperfect.*		
III	इन्द्धे	इन्धाते	इन्धते	ऐन्द्ध	ऐन्धाताम्	ऐन्धत
II	इन्त्से	इन्धाथे	इन्द्ध्वे	ऐन्द्धाः	ऐन्धाथाम्	ऐन्द्ध्वम्
I	इन्धे	इन्ध्वहे	इन्ध्महे	ऐन्धि	ऐन्ध्वहि	ऐन्ध्महि
	Imperative.			*Potential.*		
III	इन्द्धाम्	इन्धाताम्	इन्धताम्	इन्धीत	इन्धीयाताम्	इन्धीरन्
II	इन्त्स्व	इन्धाथाम्	इन्द्ध्वम्	इन्धीथाः	इन्धीयाथाम्	इन्धीध्वम्
I	इनधै	इनधावहै	इनधामहै	इन्धीय	इन्धीवहि	इन्धीमहि

Present. उन्द्. *to be wet. P.* *Imperfect.*

III	उनत्ति	उन्त्तः	उन्दन्ति	औनत्	औन्त्ताम्	औन्दन्
II	उनत्सि	उन्त्थः	उन्त्थ	औनत्	औन्त्तम्	औन्त्त
I	उनद्मि	उन्द्वः	उन्द्मः	औनदम्	औन्द्व	औन्द्म
	Imperative.			*Potential.*		
III	उनन्तु	उन्त्ताम्	उन्दन्तु	उन्द्यात्	उन्द्यास्ताम्	उन्द्युः
II	उन्द्धि	उन्त्तम्	उन्त्त	उन्द्याः	उन्द्यातम्	उन्द्यात
I	उनदानि	उनदाव	उनदाम	उन्द्याम्	उन्द्याव	उन्द्याम

*तृह् *to kill. P.*

	Present.			*Imperfect.*		
III	तृणेढि	तृण्ढः	तृंहन्ति	अतृणेट्	अतृण्ढाम्	अतृंहन्
II	तृणेक्षि	तृण्ढः	तृण्ढ	अतृणेट्	अतृण्ढम्	अतृण्ढ
I	तृणेह्मि	तृंह्वः	तृंह्मः	अतृणहम्	अतृंह्व	अतृंह्म

* This root is irregular in the case of consonantal strong terminations न is inserted instead of न.

Digitized by Google

	S.	D.	P.	S.	D.	P.
		Imperative.			*Potential.*	
III	तृणेद्धु	तृण्ढाम्	तृंहन्तु	तृंह्यात्	तृंह्याताम्	तृंह्युः
II	तृण्ढि	तृण्ढम्	तृण्ढ	तृंह्याः	तृंह्यातम्	तृंह्यात
I	तृणहानि	तृणहाव	तृणहाम	तृंह्याम्	तृंह्याव	तृंह्याम

* पिष् *to grind. P.*

		Present.			*Imperfect.*	
III	पिनष्टि	पिंष्टः	पिंषन्ति	अपिनट्	अपिंष्टाम्	अपिंषन्
II	पिनक्षि	पिंष्ठः	पिंष्ठ	अपिनट्	अपिंष्टम्	अपिंष्ट
I	पिनष्मि	पिंष्वः	पिंष्मः	अपिनषम्	अपिंष्व	अपिंष्म
		Imperative.			*Potential.*	
III	पिनष्टु	पिंष्टाम्	पिंषन्तु	पिंष्यात्	पिंष्याताम्	पिंष्युः
II	पिण्ड्धि	पिंष्टम्	पिंष्ट	पिंष्याः	पिंष्यातम्	पिंष्यात
I	पिनषाणि	पिनषाव	पिनषाम	पिंष्याम्	पिंष्याव	पिंष्याम

† भिद् *to break. P. A.*

	P.		*Present.*	A.		
III	भिनत्ति	भिन्तः	भिन्दन्ति	भिन्ते	भिन्दाते	भिन्दते
II	भिनत्सि	भिन्थः	भिन्थ	भिन्त्से	भिन्दाथे	भिन्द्ध्वे
I	भिनद्मि	भिन्द्वः	भिन्द्मः	भिन्दे	भिन्द्वहे	भिन्द्महे
			Imperfect.			
III	अभिनत्	अभिन्ताम्	अभिन्दन्	अभिन्त	अभिन्दाताम्	अभिन्दत
II	अभिनत्	अभिन्तम्	अभिन्त	अभिन्थाः	अभिन्दाथाम्	अभिन्द्ध्वम्
I	अभिनदम्	अभिन्द्व	अभिन्द्म	अभिन्दि	अभिन्द्वहि	अभिन्द्महि
			Imperative.			
III	भिनत्तु	भिन्ताम्	भिन्दन्तु	भिन्ताम्	भिन्दाताम्	भिन्दताम्
II	भिन्द्धि	भिन्तम्	भिन्त	भिन्त्स्व	भिन्दाथाम्	भिन्द्ध्वम्
I	भिनदानि	भिनदाव	भिनदाम	भिनदै	भिनदावहै	भिनदामहै
			Potential.			
III	भिन्द्यात्	भिन्द्याताम्	भिन्द्युः	भिन्दीत	भिन्दीयाताम्	भिन्दीरन्
II	भिन्द्याः	भिन्द्यातम्	भिन्द्यात	भिन्दीथाः	भिन्दीयाथाम्	भिन्दीध्वम्
I	भिन्द्याम्	भिन्द्याव	भिन्द्याम	भिन्दीय	भिन्दीवहि	भिन्दीमहि

* शिष to distinguish, is conjugated like पिष्.

† क्षुद् P. A, छिद् P. A. छृद् P. A, कृत् P. तृद् P. A, खिद् A, विद् P. A. are conjugated like भिद्.

Digitized by Google

	S.	D.	P.	S.	D.	P.

* युज् *to join.* P. A.

Present.

	P.			A.		
III	युनक्ति	युङ्क्तः	युञ्जन्ति	युङ्क्ते	युञ्जाते	युञ्जते
II	युनक्षि	युङ्क्थः	युङ्क्थ	युङ्क्षे	युञ्जाथे	युङ्ग्ध्वे
I	युनज्मि	युञ्ज्वः	युञ्ज्मः	युञ्जे	युञ्ज्वहे	युञ्ज्महे

Imperfect.

	P.			A.		
III	अयुनक्	अयुङ्क्ताम्	अयुञ्जन्	अयुङ्क्त	अयुञ्जाताम्	अयुञ्जत
II	अयुनक्	अयुङ्क्तम्	अयुङ्क्त	अयुङ्क्थाः	अयुञ्जाथाम्	अयुङ्ग्ध्वम्
I	अयुनजम्	अयुञ्ज्व	अयुञ्ज्म	अयुञ्जि	अयुञ्ज्वहि	अयुञ्ज्महि

Imperative.

	P.			A.		
III	युनक्तु	युङ्क्ताम्	युञ्जन्तु	युङ्क्ताम्	युञ्जाताम्	युञ्जताम्
II	युङ्ग्धि	युङ्क्तम्	युङ्क्त	युङ्क्ष्व	युञ्जाथाम्	युङ्ग्ध्वम्
I	युनजानि	युनजाव	युनजाम	युनजै	युनजावहै	युनजामहै

Potential.

	P.			A.		
III	युञ्ज्यात्	युञ्ज्याताम्	युञ्ज्युः	युञ्जीत	युञ्जीयाताम्	युञ्जीरन्
II	युञ्ज्याः	युञ्ज्यातम्	युञ्ज्यात	युञ्जीथाः	युञ्जीयाथाम्	युञ्जीध्वम्
I	युञ्ज्याम्	युञ्ज्याव	युञ्ज्याम	युञ्जीय	युञ्जीवहि	युञ्जीमहि

रिच् *to evacuate.* P. A.

Present.

	P.			A.		
III	रिणक्ति	रिङ्क्तः	रिञ्चन्ति	रिङ्क्ते	रिञ्चाते	रिञ्चते
II	रिणक्षि	रिङ्क्थः	रिङ्क्थ	रिङ्क्षे	रिञ्चाथे	रिङ्ग्ध्वे
I	रिणच्मि	रिञ्च्वः	रिञ्च्मः	रिञ्चे	रिञ्च्वहे	रिञ्च्महे

Imperfect.

	P.			A.		
III	अरिणक्	अरिङ्क्ताम्	अरिञ्चन्	अरिङ्क्त	अरिञ्चाताम्	अरिञ्चत
II	अरिणक्	अरिङ्क्तम्	अरिङ्क्त	अरिङ्क्थाः	अरिञ्चाथाम्	अरिङ्ग्ध्वम्
I	अरिणचम्	अरिञ्च्व	अरिञ्च्म	अरिञ्चि	अरिञ्च्वहि	अरिञ्च्महि

Imperative.

	P.			A.		
III	रिणक्तु	रिङ्क्ताम्	रिञ्चन्तु	रिङ्क्ताम्	रिञ्चाताम्	रिञ्चताम्
II	रिङ्ग्धि	रिङ्क्तम्	रिङ्क्त	रिङ्क्ष्व	रिञ्चाथाम्	रिङ्ग्ध्वम्
I	रिणचानि	रिणचाव	रिणचाम	रिणचै	रिणचावहै	रिणचामहै

* भञ्ज् P., भुज् P., विज् P., वृज्, P. are conjugated like युज्.

Digitized by Google

	S.	D.	P.	S.	D.	P.
		P.	*Potential.*		A.	
III	रिञ्च्यात्	रिञ्च्यातां	रिञ्च्युः	रिञ्चीत	रिञ्चीयातां	रिञ्चीरन्
II	रिञ्च्याः	रिञ्च्यातं	रिञ्च्यात	रिञ्चीथाः	रिञ्चीयाथां	रिञ्चीध्वं
I	रिञ्च्याम्	रिञ्च्याव	रिञ्च्याम	रिञ्चीय	रिञ्चीवहि	रिञ्चीमहि

रुध् *to obstruct. P. A.*

Present.

III	रुणद्धि	रुन्द्धः	रुन्धन्ति	रुन्द्धे	रुन्धाते	रुन्धते
II	रुणत्सि	रुन्द्धः	रुन्द्ध	रुन्त्से	रुन्धाथे	रुन्द्ध्वे
I	रुणध्मि	रुन्ध्वः	रुन्ध्मः	रुन्धे	रुन्ध्वहे	रुन्ध्महे

Imperfect.

III	अरुणत्	अरुन्द्धाम्	अरुन्धन्	अरुन्द्ध	अरुन्धाताम्	अरुन्धत
II	अरुणत्, अरुणः	अरुन्द्धम्	अरुन्द्ध	अरुन्द्धाः	अरुन्धाथाम्	अरुन्द्ध्वम्
I	अरुणधम्	अरुन्ध्व	अरुन्ध्म	अरुन्धि	अरुन्ध्वहि	अरुन्ध्महि

Imperative.

III	रुणद्धु	रुन्द्धाम्	रुन्धन्तु	रुन्द्धाम्	रुन्धाताम्	रुन्धताम्
II	रुन्द्धि	रुन्द्धम्	रुन्द्ध	रुन्त्स्व	रुन्धाथाम्	रुन्द्ध्वम्
I	रुणधानि	रुणधाव	रुणधाम	रुणधै	रुणधावहै	रुणधामहै

Potential.

III	रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः	रुन्धीत	रुन्धीयाताम्	रुन्धीरन्
II	रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात	रुन्धीथाः	रुन्धीयाथाम्	रुन्धीध्वम्
I	रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम	रुन्धीय	रुन्धीवहि	रुन्धीमहि

हिंस् *to kill. P.*

	Present.			*Imperfect.*		
III	हिनस्ति	हिंस्तः	हिंसन्ति	अहिनत्	अहिंस्ताम्	अहिंसन्
II	हिनस्सि	हिंस्थः	हिंस्थ	अहिनत्, अहिनः	अहिंस्तम्	अहिंस्त
I	हिनस्मि	हिंस्वः	हिंस्मः	अहिनसम्	अहिंस्व	अहिंस्म

	Imperative.			*Potential.*		
III	हिनस्तु	हिंस्ताम्	हिंसन्तु	हिंस्यात्	हिंस्याताम्	हिंस्युः
II	हिन्धि	हिंस्तम्	हिंस्त	हिंस्याः	हिंस्यातम्	हिंस्यात
I	हिनसानि	हिनसाव	हिनसाम	हिंस्याम्	हिंस्याव	हिंस्याम

Digitized by Google

Ninth Conjugation.

In the 9th Conjugation ना is inserted between the root and the terminations. आ of the ना is dropped before weak terminations beginning with a vowel, and it is changed to ई before weak terminations beginning with a consonant.

	S.	D.	P.	S.	D.	P.
	P.		*Present tense.*	A.		
	मी *to destroy. P. A.*					
III	मीनाति	मीनीतः	मीनन्ति	मीनीते	मीनाते	मीनते
II	मीनासि	मीनीथः	मीनीथ	मीनीषे	मीनाथे	मीनीध्वे
I	मीनामि	मीनीवः	मीनीमः	मीने	मीनीवहे	मीनीमहे
			Imperfect.			
	क्लिश् *to torture. P.*			क्री *to buy. A.*		
III	अक्लिशात्	अक्लिशीताम्	अक्लिशन्	अक्रीणीत	अक्रीणाताम्	अक्रीणत
II	अक्लिशाः	अक्लिशीतम्	अक्लिशीत	अक्रीणीथाः	अक्रीणाथाम्	अक्रीणीध्वम्
I	अक्लिशाम्	अक्लिशीव	अक्लिशीम	अक्रीणि	अक्रीणीवहि	अक्रीणीमहि
			Imperative.			
	अश् *to eat. P.*			प्री *to love. A.*		
III	अश्नातु	अश्नीताम्	अश्नन्तु	प्रीणीताम्	प्रीणाताम्	प्रीणताम्
II	अशान *	अश्नीतम्	अश्नीत	प्रीणीष्व	प्रीणाथाम्	प्रीणीध्वम्
I	अश्नानि	अश्नाव	अश्नाम	प्रीणै	प्रीणावहै	प्रीणामहै
			पू *to purify.*			
III			पुनातु पुनीताम् पुनन्तु			
II			पुनीहि पुनीतम् पुनीत			
I			पुनानि पुनाव पुनाम			
			Potential.			
	क्षुभ् *to agitate. P.*			सि *to bind. A.*		
III	क्षुभ्नीयात्†	क्षुभ्नीयाताम्	क्षुभ्नीयुः	सिनीत	सिनीयाताम्	सिनीरन्
II	क्षुभ्नीयाः	क्षुभ्नीयातम्	क्षुभ्नीयात	सिनीथाः	सिनीयाथाम्	सिनीध्वम्
I	क्षुभ्नीयाम्	क्षुभ्नीयाव	क्षुभ्नीयाम	सिनीय	सिनीवहि	सिनीमहि

Irregularities of the 9th Conjugation.

1. The penultimate nasal of a root is dropped before ना, as ग्रथ्नाति, ग्रथ्नीतः, ग्रथ्नन्ति, &c., from ग्रन्थ् to put together.

---

* *Vide* page 11.

† न् is not changed to ण् in the case of this root.

Digitized by Google

2. The letter ऋ of the root ग्रह् is changed to ऋ as गृह्णाति.

3. The root ज्ञा, to know, assumes the form जा as जानाति.

4. The long vowel at the end of roots, री, ली, धू, पू, लू, जू, दृ, पृ, वृ, स्तृ, धृ, गृ, भृ is shortened; as रिणाति, लिनाति, धुनाति &c.

5. ज्या to become old becomes जि, as जिनाति.

Voice प्रयोग.

There are three voices in Sanskrit. The active voice (कर्तरिप्रयोगः) as रामः वदति, कृष्णः फलं अत्ति, the passive voice (कर्मणिप्रयोगः) as कृष्णेन फलमद्यते and the impersonal form (भावेप्रयोगः) as हरिणा गम्यते. The transitive verbs are used in two voices, in the active and the passive, and intransitive verbs are used in two voices, in the active and impersonal forms. The forms given herein before are active; we shall briefly treat the passive and impersonal forms.

No conjugational distinction is observed in the passive and impersonal forms; all roots are to be considered as if they belong to one class, and consequently are conjugated in the same manner. य is added on to the root in conjugational tenses, Atmanepada terminations given in 4th, 5th, 6th, 7th pages, being appended.

नम् *to bend.*

	S.	*D.*	*P.*	*S.*	*D.*	*P.*
		Present.			*Imperfect.*	
III	नम्यते	नम्येते	नम्यन्ते	अनम्यत	अनम्येताम्	अनम्यन्त
II	नम्यसे	नम्येथे	नम्यध्वे	अनम्यथाः	अनम्येथाम्	अनम्यध्वम्
I	नम्ये	नम्यावहे	नम्यामहे	अनम्ये	अनम्यावहि	अनम्यामहि
		Imperative.			*Potential.*	
III	नम्यताम्	नम्येताम्	नम्यन्ताम्	नम्येत	नम्येयाताम्	नम्येरन्
II	नम्यस्व	नम्येथाम्	नम्यध्वम्	नम्येथाः	नम्येयाथाम्	नम्येध्वम्
I	नम्यै	नम्यावहै	नम्यामहै	नम्येय	नम्येवहि	नम्येमहि

NOTE.—We can safely say that the passive verbs are conjugated exactly like active atmanepada verbs belonging to the 4th conjugation.

Some roots assume peculiar forms before the य; we notice them here.

1. Roots ending in ऋ change their ऋ, if it is not preceded by a conjunct consonant, to रि as भृ to fill भ्रियते, and to अर् when preceded

Digitized by Google

by a conjunct consonant as स्मृ to remember स्मर्यते. The root ऋ to go is changed to अर् as अर्यते.

2. The ending ऋ is changed to ईर् as तॄ to cross तीर्यते; पॄ, पूर्यते*.

3. A short इ or उ at the end of a root becomes long; as जि to conquer जीयते, स्तु to praise स्तूयते.

4. The ending vowel of the roots, दा to give, धा to put, मा to measure, स्था to stand, गै to sing, पा to drink, हा to abandon, and सो to finish is changed to ई as दीयते, धीयते, मीयते, स्थीयते, गीयते, पीयते, हीयते, सीयते, &c.

† 5. The letter य in the roots यज्, व्यच्, व्यध्, and ज्या is changed to इ; र in the roots ग्रच्छ्, व्रश्च्, भ्रस्ज्, and मृज् is changed to ऋ; and व in the roots वच्, वप्, वह्, वस्, वद्, वश्, स्वप्, and वि and वे in the roots ष्वि, वे and व्ये is changed to उ, as इज्यते, विच्यते, विध्यते, जीयते, पृच्छ्यते, वृश्च्यते, भृज्ज्यते, गृह्यते, उच्यते, उप्यते, उह्यते, उष्यते, उह्यते, उश्यते, सुप्यते, शूयते, ऊयते, हूयते, &c.

6. The penultimate nasal of roots, शंस्, ध्वंस्, स्रंस्, मन्थ्, कुञ्च्, लुञ्च्, भ्रंश्, भ्रंस्, स्यन्द्, स्वञ्ज्, स्कन्द्, सञ्ज्, दंश्, रञ्ज्, दम्भ्, गुम्फ्, इन्ध्, भञ्ज्, अञ्ज्, स्तम्भ्, बन्ध्, श्रन्थ्, ग्रन्थ्, वञ्च्, and some others not important is dropped before य of the Passive; as शस्यते, ध्वस्यते, स्रस्यते, &c.

7. Roots of the tenth conjugation, vowels of which take a guṇa or a vriddhi substitute in the active voice, undergo the same change before the य of the Passive, as चुर् to steal, active चोरयति; Passive चोर्यते; तड् to beat ताडयति active, ताड्यते Passive.

8. The Passive of तन् is तन्यते or तायते.

9. The ई of the root क्षी is changed to अय् before य of the Passive; as क्षय्यते.

10. The Passive of शास् is शिष्यते.

---

* *Vide* page 6th Note †.

† The change of य्, व्, and र् to इ, उ and ऋ is called संप्रसारण in Sanskrit grammar.

Digitized by Google

Digitized by Google

A GUIDE
TO
SANSKRIT VERBS.

PART II.

Non-Conjugational Tenses.

GENERAL RULES.

I. In treating the Non-conjugational Tenses roots are divided into two groups; one is called Set, (सेट्) and the other is called Anit (अनिट्).

II. इ is prefixed to those terminations which begin with any consonant except य्, in the case of some roots; these are called Set (सेट्) and others are called Anit (अनिट्); there are others again which take इ optionally, and are therefore called Wet (वेट्).

III. Roots ending in ए, ऐ, and ओ change their final vowel to आ.

IV. अस् and ब्रू are not used in these tenses, but they take भू and वच् respectively to make up their forms. चक्ष् is used in the perfect only.

V. अय् is added to the roots of the tenth conjugation, before which a root undergoes the same changes as before the अय in the conjugational tenses.

VI. The roots गुप्, धूप्, विच्छ्, पण्, and पन् take आय् optionally before the terminations of all these tenses. कम् takes अय् optionally before which the penultimate अ takes वृद्धि.

VII. मि to throw मी to destroy and री to perish, change their final vowel to आ before strong terminations and ली to attain does the same optionally.

The First and Second Futures and the Conditional.

Terminations of the First Future.

Anit.

	Parasmaipada.			*Atmanepada.*		
	S.	*D.*	*P.*	*S.*	*D.*	*P.*
III	ता	तारौ	तारः	ता	तारौ	तारः
II	तासि	तास्थः	तास्थ	तासे	तासाथे	ताध्वे
I	तास्मि	तास्वः	तास्मः	ताहे	तास्वहे	तास्महे

Digitized by Google

Set.

III	इता	इतारौ	इतारः	इता	इतारौ	इतारः
II	इतासि	इतास्थः	इतास्थ	इतासे	इतासाथे	इताध्वे
I	इतास्मि	इतास्वः	इतास्मः	इताहे	इतास्वहे	इतास्महे

Terminations of the Second Future.

Anit.

	P.			A.		
	S.	*D.*	*P.*	*S.*	*D.*	*P.*
III	स्यति	स्यतः	स्यन्ति	स्यते	स्येते	स्यन्ते
II	स्यसि	स्यथः	स्यथ	स्यसे	स्येथे	स्यध्वे
I	स्यामि	स्यावः	स्यामः	स्ये	स्यावहे	स्यामहे

Set.

III	इष्यति	इष्यतः	इष्यन्ति	इष्यते	इष्येते	इष्यन्ते
II	इष्यसि	इष्यथः	इष्यथ	इष्यसे	इष्येथे	इष्यध्वे
I	इष्यामि	इष्यावः	इष्यामः	इष्ये	इष्यावहे	इष्यामहे

Terminations of the Conditional.

Anit.

III	स्यत्	स्यताम्	स्यन्	स्यत	स्येताम्	स्यन्त
II	स्यः	स्यतम्	स्यत	स्यथाः	स्येथाम्	स्यध्वम्
I	स्यम्	स्याव	स्याम	स्ये	स्यावहि	स्यामहि

Set.

III	इष्यत्	इष्यताम्	इष्यन्	इष्यत	इष्येताम्	इष्यन्त
II	इष्यः	इष्यतम्	इष्यत	इष्यथाः	इष्येथाम्	इष्यध्वम्
I	इष्यम्	इष्याव	इष्याम	इष्ये	इष्यावहि	इष्यामहि

All the above mentioned terminations are strong, therefore the final vowel and penultimate short vowel of a root takes its गुण substitute before all of these.

The First Future.

Anit.

	Parasmaipada.			*Atmanepada.*		
	दा *to give.*			धा *to put.*		
III	दाता	दातारौ	दातारः	धाता	धातारौ	धातारः
II	दातासि	दातास्थः	दातास्थ	धातासे	धातासाथे	धाताध्वे
I	दातास्मि	दातास्वः	दातास्मः	धाताहे	धातास्वहे	धातास्महे

Digitized by Google

Set.

	P.			A.	
S.	*D.*	*P.*	*S.*	*D.*	*P.*
पत् *to fall.*			वन्द् *to salute.*		
III पतिता	पतितारौ	पतितारः	वन्दिता	वन्दितारौ	वन्दितारः
II पतितासि	पतितास्थः	पतितास्थ	वन्दितासे	वन्दितासाथे	वन्दिताध्वे
I पतितास्मि	पतितास्वः	पतितास्मः	वन्दिताहे	वन्दितास्वहे	वन्दितास्महे

The Second Future.

Anit.

हा *to abandon.*			हा *to go.*		
III हास्यति	हास्यतः	हास्यन्ति	हास्यते	हास्येते	हास्यन्ते
II हास्यसि	हास्यथः	हास्यथ	हास्यसे	हास्येथे	हास्यध्वे
I हास्यामि	हास्यावः	हास्यामः	हास्ये	हास्यावहे	हास्यामहे

Set.

रक्ष् *to protect.*			कम्प् *to shake.*		
III रक्षिष्यति	रक्षिष्यतः	रक्षिष्यन्ति	कम्पिष्यते	कम्पिष्येते	कम्पिष्यन्ते
II रक्षिष्यसि	रक्षिष्यथः	रक्षिष्यथ	कम्पिष्यसे	कम्पिष्येथे	कम्पिष्यध्वे
I रक्षिष्यामि	रक्षिष्यावः	रक्षिष्यामः	कम्पिष्ये	कम्पिष्यावहे	कम्पिष्यामहे

Conditional.

The augment अ *is prefixed to the root in this mood.*

Anit.

पा *to drink.*			मा *to measure.*		
III अपास्यत्	अपास्यताम्	अपास्यन्	अमास्यत	अमास्येताम्	अमास्यन्त
II अपास्यः	अपास्यतम्	अपास्यत	अमास्यथाः	अमास्येथाम्	अमास्यध्वम्
I अपास्यम्	अपास्याव	अपास्याम	अमास्ये	अमास्यावहि	अमास्यामहि

Set.

गद् *to speak.*			वेप् *to tremble.*		
III अगदिष्यत्	अगदिष्यताम्	अगदिष्यन्	अवेपिष्यत	अवेपिष्येताम्	अवेपिष्यन्त
II अगदिष्यः	अगदिष्यतम्	अगदिष्यत	अवेपिष्यथाः	अवेपिष्येथाम्	अवेपिष्यध्वम्
I अगदिष्यम्	अगदिष्याव	अगदिष्याम	अवेपिष्ये	अवेपिष्यावहि	अवेपिष्यामहि

Digitized by Google

In learning the forms of the non-conjugational tenses it is indispensably necessary for a student to know which roots are Seṭ and which Aniṭ. We shall, therefore, enumerate them here.

Roots ending in long ऊ and long ॠ and the roots द्यु (2nd conj.) रु, क्ष्णु, ष्ठी, ष्णु, नु, क्षु, ष्वि, डी, श्वि and वृ are Set, and all other monosyllabic roots ending in a vowel are Aniṭ. Therefore the forms of the root भू to be, are भविता, भविष्यति, अभविष्यत्, but those of the root स्तु are स्तोता, स्तोष्यति, अस्तोष्यत्.

Roots having more than one syllable are Seṭ.

Among roots ending in a vowel a few roots are Seṭ; but contrary is the case with roots ending in a consonant. Among these there is a very small number (102) of Aniṭ roots. We shall therefore enumerate them here, with the 3rd person singular of the 1st and 2nd futures and conditional.

	Roots.		First F. 3rd P. S.	Second F. 3rd P. S.	Conditional 3rd P. S.
Ending in क्	शक्	(5th conj.) to be able	शक्ता	शक्ष्यति	अशक्ष्यत्
Ending in च्	पच्	to cook	पक्ता	पक्ष्यति	अपक्ष्यत्
	मुच्	to leave	मोक्ता	मोक्ष्यति	अमोक्ष्यत्
	रिच्	to evacuate	रेक्ता	रेक्ष्यति	अरेक्ष्यत्
	वच्	to speak	वक्ता	वक्ष्यति	अवक्ष्यत्
	विच्	to separate	वेक्ता	वेक्ष्यति	अवेक्ष्यत्
	सिच्	to sprinkle	सेक्ता	सेक्ष्यति	असेक्ष्यत्
Ending in छ्	प्रच्छ्	to ask	प्रष्टा	प्रक्ष्यति	अप्रक्ष्यत्
Ending in ज्	त्यज्	to leave	त्यक्ता	त्यक्ष्यति	अत्यक्ष्यत्
	निज्	(3rd conj) to purify	नेक्ता	नेक्ष्यति	अनेक्ष्यत्
	भज्	to serve	भक्ता	भक्ष्यति	अभक्ष्यत्
	भञ्ज्	to break	भङ्क्ता	भङ्क्ष्यति	अभङ्क्ष्यत्
	भुज्	to enjoy	भोक्ता	भोक्ष्यति	अभोक्ष्यत्
	*भ्रस्ज्	to fry	भ्रष्टा / भर्ष्टा	भ्रक्ष्यति / भर्क्ष्यति	अभ्रक्ष्यत् / अभर्क्ष्यत्
	मस्ज्	to sink	मङ्क्ता	मङ्क्ष्यति	अमङ्क्ष्यत्
	यज्	to worship	यष्टा	यक्ष्यति	अयक्ष्यत्
	युज्	to join	योक्ता	योक्ष्यति	अयोक्ष्यत्

* This root assumes two forms भ्रज्ज् and भर्ज् in all the non-conjugational tenses.

Digitized by Google

Ending in ज्	रुज्	to be afflicted with disease	रोक्ता	रोक्ष्यति	अरोक्ष्यत्
	रञ्ज्	to color	रङ्क्ता	रङ्क्ष्यति	अरङ्क्ष्यत्
	विज्	to separate (3rd conj.)	वेक्ता	वेक्ष्यति	अवेक्ष्यत्
	स्वञ्ज्	to embrace	स्वङ्क्ता	स्वङ्क्ष्यते	अस्वङ्क्ष्यत
	सञ्ज्	to adhere	सङ्क्ता	सङ्क्ष्यति	असङ्क्ष्यत्
	सृज्	to abandon	स्रष्टा*	स्रक्ष्यति*	असृक्ष्यत्*
Ending in त्	अद्	to eat	अत्ता	अत्स्यति	आत्स्यत्
	क्षुद्	to pound	क्षोत्ता	क्षोत्स्यति	अक्षोत्स्यत
	खिद्	to be afflicted	खेत्ता	खेत्स्यति	अखेत्स्यत्
	छिद्	to cut	छेत्ता	छेत्स्यति	अछेत्स्यत्
	तुद्	to give pain	तोत्ता	तोत्स्यति	अतोत्स्यत्
	नुद्	to remove	नोत्ता	नोत्स्यति	अनोत्स्यत्
	पद्	to go (4th conj.)	पत्ता	पत्स्यते	अपत्स्यत
	भिद्	to split	भेत्ता	भेत्स्यति	अभेत्स्यत्
	विद्	to be (4th conj.) / ,, to know (7th conj.)	वेत्ता	वेत्स्यति	अवेत्स्यत्
	शद्	to cut	शत्ता	शत्स्यति	अशत्स्यत्
	सद्	to be weary	सत्ता	सत्स्यति	असत्स्यत्
	स्विद्	to perspire (4th conj.)	स्वेत्ता	स्वेत्स्यति	अस्वेत्स्यत्
	स्कन्द्	to go	स्कन्त्ता	स्कन्त्स्यति	अस्कन्त्स्यत्
	हद्	to evacuate	हत्ता	हत्स्यति	अहत्स्यत्
Ending in द्	क्रुध्	to be angry	क्रोद्धा	क्रोत्स्यति	अक्रोत्स्यत्
	क्षुध्	to be hungry	क्षोद्धा	क्षोत्स्यति	अक्षोत्स्यत्
	बुध्	to know (4th conj.)	बोद्धा	भोत्स्यति†	अभोत्स्यत्†
	बन्ध्	to bind	बन्द्धा	भन्त्स्यति†	अभन्त्स्यत्†
	युध्	to fight	योद्धा	योत्स्यते	अयोत्स्यत
	रुध्	to obstruct	रोद्धा	रोत्स्यति	अरोत्स्यत्
	राध्	to accomplish	राद्धा	रात्स्यति	अरात्स्यत्
	व्यध्	to hurt	व्यद्धा	व्यत्स्यति	अव्यत्स्यत्
	शुध्	to be purified	शोद्धा	शोत्स्यति	अशोत्स्यत्
	साध्	to accomplish	साद्धा	सात्स्यति	असात्स्यत्
	सिध्	to be ready (4th conj.)	सेद्धा	सेत्स्यति	असेत्स्यत्

* The penultimate ऋ of सृज् and दृश् is changed to र् before consonantal strong terminations of Non-conjugational Tenses.

† Roots beginning with ब्, ग्, द्, and ending with a fourth letter of a class, change their initial letters to the fourth letter of their class when followed by स्, ध्, or nothing.

Digitized by Google

E. ङ	मन्	to think	मन्ता	मंस्यते	अमंस्यत
E. ङ	हन्	to kill	हन्ता	*हनिष्यति	*अहनिष्यत्
Ending in प	आप्	to obtain	आप्ता	आप्स्यति	आप्स्यत्
	क्षिप्	to throw	क्षेप्ता	क्षेप्स्यति	अक्षेप्स्यत्
	छुप्	to touch	छोप्ता	छोप्स्यति	अछोप्स्यत्
	तप्	to heat	तप्ता	तप्स्यति	अतप्स्यत्
	तिप्	to drop	तेप्ता	तेप्स्यति	अतेप्स्यत्
	तृप्	to be satisfied (4th conj.)	तर्प्ता	†तप्स्यति	†अतप्स्यत्
			त्रप्ता	त्रप्स्यति	अत्रप्स्यत्
	दृप्	to be proud (4th conj.)	†दर्प्ता	†दप्स्यति	†अदप्स्यत्
			द्रप्ता	द्रप्स्यति	अद्रप्स्यत्
	लिप्	to anoint	लेप्ता	लेप्स्यति	अलेप्स्यत्
	लुप्	to cut	लोप्ता	लोप्स्यति	अलोप्स्यत्
	वप्	to sow or cut	वप्ता	वप्स्यति	अवप्स्यत्
	शप्	to swear, curse	शप्ता	शप्स्यति	अशप्स्यत्
	स्वप्	to sleep	स्वप्ता	स्वप्स्यति	अस्वप्स्यत्
	सृप्	to move	सर्प्ता	†सप्स्यति	†असप्स्यत्
			स्रप्ता	स्रप्स्यति	अस्रप्स्यत्
E. भ	यभ्	to cohabit	यब्धा	यप्स्यते	अयप्स्यत
E. भ	रभ्	to begin	रब्धा	रप्स्यते	अरप्स्यत
E. भ	लभ्	to get	लब्धा	लप्स्यते	अलप्स्यत
E. म	गम्	to go	गन्ता	‡गमिष्यति / संगंस्यते	‡अगमिष्यत् / समगंस्यत
E. म	नम्	to bend	नन्ता	नंस्यति	अनंस्यत्
E. म	यम्	to restrain	यन्ता	यंस्यति	अयंस्यत्
E. म	रम्	to play	रन्ता	रंस्यते	अरंस्यत
Ending in क्ष	क्रुश्	to cry	क्रोष्टा	क्रोक्ष्यति	अक्रोक्ष्यत्
	दंश्	to bite	दंष्टा	दक्ष्यति	अदक्ष्यत्
	दिश्	to show	देष्टा	देक्ष्यति	अदेक्ष्यत्
	दृश्	to see	द्रष्टा	द्रक्ष्यति	अद्रक्ष्यत्
	मृश्	to think	मर्ष्टा	मक्ष्यति	अमक्ष्यत्
			म्रष्टा	म्रक्ष्यति	अम्रक्ष्यत्
	रिश्	to hurt	रेष्टा	रेक्ष्यति	अरेक्ष्यत्

* Anit roots ending in short ऋ and the root हन् take इ before स्य.

† Penultimate ऋ of Anit root is changed to र optionally before consonantal strong terminations.

‡ गम् with सम् takes Âtmanepada. Though Anit, it takes इ before terminations beginning with स् in Parasmaipada.

Digitized by Google

Ending in ष्	रुष् to hurt	रोष्टा	रोक्ष्यति	अरोक्ष्यत्
	लिष् to lessen	लेष्टा	लेक्ष्यति	अलेक्ष्यत्
	विश् to enter	वेष्टा	वेक्ष्यति	अवेक्ष्यत्
	स्पृश् to touch	स्पर्ष्टा / स्पष्टा	स्पक्ष्यति / स्प्रक्ष्यति	अस्पक्ष्यत् / अस्प्रक्ष्यत्
Ending in क्ष्	कृष् to draw	कर्ष्टा / कृष्टा	कक्ष्यति / क्रक्ष्यति	अकक्ष्यत् / अक्रक्ष्यत्
	त्विष् to shine	त्वेष्टा	त्वेक्ष्यति	अत्वेक्ष्यत्
	तुष् to be pleased	तोष्टा	तोक्ष्यति	अतोक्ष्यत्
	द्विष् to hate	द्वेष्टा	द्वेक्ष्यति	अद्वेक्ष्यत्
	दुष् to be depraved	दोष्टा	दोक्ष्यति	अदोक्ष्यत्
	पुष् (to nourish (4th conj.))	पोष्टा	पोक्ष्यति	अपोक्ष्यत्
	पिष् to grind	पेष्टा	पेक्ष्यति	अपेक्ष्यत्
	विष् to surround	वेष्टा	वेक्ष्यति	अवेक्ष्यत्
	शिष् to distinguish	शेष्टा	शेक्ष्यति	अशेक्ष्यत्
	शुष् to dry	शोष्टा	शोक्ष्यति	अशोक्ष्यत्
	श्लिष् (to embrace (4th conj.))	श्लेष्टा	श्लेक्ष्यति	अश्लेक्ष्यत्
Ending in स्	घस् to eat	घस्ता	घस्स्यति	अघस्स्यत्
	वस् to dwell	वस्ता	वस्स्यति	अवस्स्यत्
Ending in ह्	दह् to burn	दग्धा	धक्ष्यति	अधक्ष्यत्
	दिह् to anoint	देग्धा	धेक्ष्यति	अधेक्ष्यत्
	दुह् to milk	दोग्धा	धोक्ष्यति	अधोक्ष्यत्
	नह् to bind	नद्धा	नत्स्यति	अनत्स्यत्
	मिह् to sprinkle	मेढा	मेक्ष्यति	अमेक्ष्यत्
	रुह् to grow	रोढा	रोक्ष्यति	अरोक्ष्यत्
	लिह् to lick	लेढा	लेक्ष्यति	अलेक्ष्यत्
	वह् to blow	वोढा	वक्ष्यति	अवक्ष्यत्

All other roots besides these ending in a consonant are Set. All derived roots are also Set.

The following important rules of Sandhi may be learned with advantage. They are very useful for learning the forms of Anit roots.

I. The ending ह् of a root is changed to द् when followed by any consonant except a nasal or a semi-vowel, as लिह् + ता = लेह् + ता = लेढ् + ता.

Digitized by Google

The initial त् and थ् of a termination are changed to ध् when preceded by घ्, झ्, द्, ध्, or भ्; therefore लेद् + धा.

When a dental consonant (त्, थ्, द्, ध्, न्, स्) comes, near a palatal, (च्, छ्, ज्, झ्, ञ्, श्) or lingual (ट्, ठ्, ड्, ढ्, ण्, ष्) consonant, the corresponding palatal or lingual consonant is substituted for the dental consonant; as लेद् + धा = लेद् + ढा.

द् followed by द् is dropped and the preceding vowel (अ, इ, उ,) if short is made long; लेद् + ढा = लेढा. लिह् + तः = लिढ् + तः = लिद् + धः = लिद् + ढः = लीढः.

The ending ह् of a root beginning with द् is changed to घ् before any consonant except a nasal or semi-vowel; दुह् + ता = दोघ् + ता दोघ् + धा.

A consonant followed by a hard or soft consonant is changed to the first or third letter of its class respectively; दोघ् + धा = दोग्धा, अद् + स्यति = अत्स्यति.

When a root containing one vowel only begins with ब्, ग् or द्, and ends in a fourth letter of a class, the ब्, ग्, द् are changed to भ्, घ्, ध्, respectively, when followed by स्, ध्व् or nothing दुह् + स्यति, = दोघ् + स्यति = धोघ् + स्यति = धोक् + स्यति.

स् coming after any vowel except अ or आ or a guttural consonant (क्, ख्, ग्, घ्, ङ्) or ह्, य्, व्, र्, ल्, is changed to ष्. धोक् + स्यति = धोक् + ष्यति = धोक्ष्यति.

द् or ष् followed by स् is changed to क्; लिह् + स्यति = लेद् + स्यति = लेक् + स्यति = लेक् + ष्यति = लेक्ष्यति.

Roots ending in श् or छ् and the roots ब्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज् change their final letter to ष् before a consonant except nasal or semi-vowel; as दंश् + ता = दंष् + ता = दंष्टा. प्रच्छ् + ता = प्रष् + ता = प्रष्टा.

दुह्, मुह्, स्नुह्, स्निह् change their ह् to द् or घ् optionally, द्रोग्धा or द्रोढा; मोहिता, मोढा; स्नेहिता, स्नेढा.

नह् changes its ह् to ध्, नद्धा.

The following are the roots which are optionally Aniṭ (वेद्) in all non-conjugational tenses.

अञ्ज्	to anoint	अञ्जिता / अङ्क्ता	अञ्जिष्यति / अङ्क्ष्यति	आञ्जिष्यत् / आङ्क्ष्यत्
अश्	to pervade	अशिता / अष्टा	अशिष्यते / अक्ष्यते	आशिष्यत / आक्ष्यत

Digitized by Google

कृप्	to plan	कल्पिता / कल्प्ता	कल्पिष्यते, कल्प्स्यते / कल्प्स्यति*	अकल्पिष्यत, अकल्प्स्यत / अकल्प्स्यत्*
क्लिद्	to become wet	क्लेदिता / क्लेत्ता	क्लेदिष्यति / क्लेत्स्यति	अक्लेदिष्यत् / अक्लेत्स्यत्
क्लिश्	to torment	क्लेशिता / क्लेष्टा	क्लेशिष्यति / क्लेक्ष्यति	अक्लेशिष्यत् / अक्लेक्ष्यत्
क्षम्	to forgive	क्षमिता / क्षन्ता	क्षमिष्यते / क्षंस्यते	अक्षमिष्यत / अक्षंस्यत
गाह्	to enter	गाहिता / गाढा	गाहिष्यते / घाक्ष्यते	अगाहिष्यत / अघाक्ष्यत
गुप्	to protect	गोपिता / गोप्ता / गोपायिता†	गोपिष्यति / गोप्स्यति / गोपायिष्यति	अगोपिष्यत् / अगोप्स्यत् / अगोपायिष्यत्
गुह्	to hide	गूहिता / गूढा	गूहिष्यति / घोक्ष्यति	अगूहिष्यत् / अघोक्ष्यत्
तक्ष्	to make thin	तक्षिता / तष्टा	तक्षिष्यति / तक्ष्यति	अतक्षिष्यत् / अतक्ष्यत्
तृप्	to be satisfied	तर्पिता / तर्प्ता, त्रप्ता	तर्पिष्यति / त्रप्स्यति, तप्स्यति	अतर्पिष्यत् / अत्रप्स्यत्, अतप्स्यत्
त्रप्	to feel shame	त्रपिता / त्रप्ता	त्रपिष्यते / त्रप्स्यते	अत्रपिष्यत / अत्रप्स्यत
तृह्	to kill	तर्हिता, तर्ढा	तर्हिष्यति, तर्क्ष्यति	अतर्हिष्यत् / अतर्क्ष्यत्
दृप्	to be proud	दर्पिता / द्रप्ता दृप्ता	दर्पिष्यति / द्रप्स्यति, दप्स्यति	अदर्पिष्यत् / अद्रप्स्यत्, अद्रप्स्यत्
द्रुह्	to hate	द्रोहिता / द्रोढा	द्रोहिष्यति / ध्रोक्ष्यति	अद्रोहिष्यत् / अध्रोक्ष्यत्
धू	to shake	धविता / धोता	धविष्यति / धोष्यति	अधविष्यत् / अधोष्यत्
नश्	to perish	नशिता / नष्टा	नशिष्यति / नङ्क्ष्यति	अनशिष्यत् / अनङ्क्ष्यत्
मुह्	to faint	मोहिता / मोढा	मोहिष्यति / मोक्ष्यति	अमोहिष्यत् / अमोक्ष्यत्
‡मृज्	to purify	मार्जिता / मार्ष्टा	मार्जिष्यति / मार्क्ष्यति	अमार्जिष्यत् / अमार्क्ष्यत्
व्रश्च्	to cut	व्रश्चिता / व्रष्टा	व्रश्चिष्यति / व्रक्ष्यति	अव्रश्चिष्यत् / अव्रक्ष्यत्

* See Rules II. and III in page 52.

† See Rule VI., page 43.

‡ See note, * page 29, Part I.

Digitized by Google

रध्	to perish	रधिता, रद्धा	रधिष्यति, रत्स्यति	अरधिष्यत् अरत्स्यत्
सिध्	to accomplish	सेधिता / सेद्धा	सेधिष्यति / सेत्स्यति	असेधिष्यत् / असेत्स्यत्
सू	to give birth	सविता / सोता	सविष्यते / सोष्यते	असविष्यत / असोष्यत
स्निह्	to feel affection for	स्नेहिता / स्नेढा	स्नेहिष्यति / स्नेक्ष्यति	अस्नेहिष्यत् / अस्नेक्ष्यत्
स्नुह्	to vomit	स्नोहिता / स्नोढा	स्नोहिष्यति / स्नोक्ष्यति	अस्नोहिष्यत् / अस्नोक्ष्यत्
स्यन्द्	to drop down	स्यन्दिता / स्यन्ता	स्यन्दिष्यते, स्यन्त्स्यते / स्यन्त्स्यति	अस्यन्दिष्यत, अस्यन्त्स्यत / अस्यन्त्स्यत्
स्वृ	to sound	स्वरिता / स्वर्ता	स्वरिष्यति / स्वर्ष्यति	अस्वरिष्यत् / अस्वर्ष्यत्

Irregularities of the 1st and 2nd Future and Conditional.

1. The roots इष्, सह्, लुभ्, रुष्, and रिष् take both Set and Anit terminations in the 1st Future.

इष् to wish एषिता, एष्टा.
सह् to endure सहिता, सोढा.
रुष् to hurt रोषिता, रोष्टा.
रिष् to hurt रेषिता, रेष्टा.
लुभ् to covet लोभिता, लोब्धा.

2. In the 1st Future, the root क्लृप् is conjugated both in Atmanepada and Parasmaipada, and it takes Anit terminations when it takes Parasmaipada, as कल्पितासे, कल्तासे and कल्तासि.

3. The roots, क्लृप्, वृत्, वृध्, शृध्, and स्यन्द् take both Atmanepada and Parasmaipada terminations in the 2nd Future and Conditional, and are Anit when they take Parasmaipada.

		The 2nd Future.		*Conditional.*	
क्लृप्	to plan	कल्पिष्यते—कल्प्स्यति		अकल्पिष्यत—अकल्प्स्यत	
वृत्	to be	वर्तिष्यते—वर्त्स्यति		अवर्तिष्यत—अवर्त्स्यत्	
वृध्	to increase	वर्धिष्यते—वर्त्स्यति		अवर्धिष्यत—अवर्त्स्यत्	
शृध्	to break wind	शर्धिष्यते—शर्त्स्यति		अशर्धिष्यत—अशर्त्स्यत्	
स्यन्द्	to drop down	स्यन्दिष्यते / स्यन्त्स्यते	स्यन्त्स्यति	अस्यन्दिष्यत / अस्यन्त्स्यत	अस्यन्त्स्यत्

4. The roots कृत्, छृद्, तृह्, नृत्, take इ optionally before a non-conjugational termination beginning with स् except that of the Aorist. कर्तिष्यति, कर्त्स्यति; अकर्तिष्यत्, अकर्त्स्यत्, &c.

Digitized by Google

5. The conditional of the root इ with अधि to study is optionally thus conjugated.

III	अध्यगीष्यत	अध्यगीष्येताम्	अध्यगीष्यन्त
II	अध्यगीष्यथाः	अध्यगीष्येथाम्	अध्यगीष्यध्वम्
I	अध्यगीष्ये	अध्यगीष्यावहि	अध्यगीष्यामहि.

The augment इ of the non-conjugational terminations except those of the perfect in the case of the root ग्रह् is lengthened; as ग्रहीता, ग्रहीष्यति, अग्रहीष्यत्.

The इ in the case of roots, ending in (long) ऋ and the root वृ is optionally lengthened, as कृ करिता—करीता, करिष्यति—करीष्यति; वृ-वरिता—वरीता, वरिष्यति—वरीष्यति.

The following and some other roots, all of the 6th conjugation, do not take गुण before non-conjugational terminations; as कु-कुयिता, कुट्-कुटिष्यति, पुट्-अपुटिष्यत्.

कु	to make noise	तुद्	to cut
कुट्	to be crooked	तुड्	to cut
पुट्	to stick	स्फुर्	to throb
कुच्	to contract	नू	to praise
लुट्	to cut	धू	to shake
स्फुट्	to open	ध्रु	to be firm

Set terminations as applied to the root विज् to fear (6th Conj.) are weak, as विजिता, विजिष्यति, अविजिष्यत्; and those in the case of the root ऊर्णु to cover, are optionally so: ऊर्णविता or ऊर्णुविता; ऊर्णविष्यति or ऊर्णुविष्यति; और्णविष्यत् or और्णुविष्यत्.

Vide Rule VII., page 43.	धूञ् to heat	धूपायिता—धूपिता;	धूपायिष्यति—धूपिष्यति
	कमॄ to desire	कामयिता—कमिता;	कामयिष्यते—कमिष्यते
	मि (5th Conj.) to throw & मी (9th Conj.) to destroy	माता—मास्यति	अमास्यत् Conditional.
	ली to attain	लेता—लाता	लेष्यति—लास्यति

The Benedictive Mood.

Terminations.

Parasmaipada.

III	यात्	यास्ताम्	यासुः
II	याः	यास्तम्	यास्त
I	यासम्	यास्व	यास्म

Digitized by Google

There are no Seṭ terminations in Parasmaipada as they begin with झ्, but the Atmanepada terminations are both Seṭ and Anit. The Parasmaipada terminations are weak, and Atmanepada ones are strong.

Atmanepada.

	Aniṭ.			*Seṭ.*	
III	सीष्ट	सीयास्ताम्	सीरन्	इषीष्ट	इषीयास्ताम्	इषीरन्
II	सीष्ठाः	सीयास्थाम्	सीध्वम्	इषीष्ठाः	इषीयास्थाम्	इषीध्वम्
I	सीय	सीवहि	सीमहि	इषीय	इषीवहि	इषीमहि

Parasmaipada.

भू *to become.*

III	भूयात्	भूयास्ताम्	भूयासुः
II	भूयाः	भूयास्तम्	भूयास्त
I	भूयासम्	भूयास्व	भूयास्म

Atmanepada.

Aniṭ रम् *to sport.*			*Seṭ* एध् *to increase.*		
III रंसीष्ट	रंसीयास्ताम्	रंसीरन्	एधिषीष्ट	एधिषीयास्ताम्	एधिषीरन्
II रंसीष्ठाः	रंसीयास्थाम्	रंसीध्वम्	एधिषीष्ठाः	एधिषीयास्थाम्	एधिषीध्वम्
I रंसीय	रंसीवहि	रंसीमहि	एधिषीय	एधिषीवहि	एधिषीमहि

Special rules of Benedictive Parasmaipada.

Part I, Passive Rules 1, 2, 3, 5, 6, 7, and 10 hold good in the case of the Benedictive Parasmaipada also, as कृ-क्रियात्; स्मृ-स्मर्यात्; ऋ-अर्यात्; जि-जीयात्; स्तु-स्तूयात्; वच्-उच्यात्; शंस्-शस्यात् चुर्-चोर्यात्.

The roots दा, धा, and other roots assuming these forms* and roots मा, स्था, गै, पा, सो, हा; change their final vowel to ए as देयात्, धेयात्, नेयात्, स्थेयात्, गेयात्, पेयात्, सेयात्, हेयात्, &c.

